अथ मन्त्रात्मकश्लोकाः

अनसूयात्रिसंभूतो दत्तात्रेयो दिगंबरः ।
स्मर्तृगामी स्वभक्तानामुद्धर्ता भव संकटात् ॥ १ ॥

दरिद्रविप्रगेहे यः शाकं भुक्त्वोत्तमश्रियम् ।
ददौ श्रीदत्तदेवः स दारिद्र्याच्छ्रीप्रदोऽवतु ॥ २ ॥

दूरीकृत्य पिशाचार्तिं जीवयित्वा मृतं सुतम् ।
योऽभूदभीष्टदः पातु स नः संतानवृद्धिकृत् ॥ ३ ॥

जीवयामास भर्तारं मृतं सत्या हि मृत्युहा ।
मृत्युञ्जयः स योगीन्द्रः सौभाग्यं मे प्रयच्छतु ॥ ४ ॥

अत्रेरात्मप्रदानेन यो मुक्तो भगवानृणात् ।
दत्तात्रेयं तमीशानं नमामि ऋणमुक्तये ॥ ५ ॥

जपेच्छ्लोकमिमं देवपित्रर्षिपुंनृणापहम् ।
सोऽनृणो दत्तकृपया परंब्रह्माधिगच्छति ॥ ६ ॥

अत्रिपुत्रो महातेजा दत्तात्रेयो महामुनिः ।
तस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥ ७ ॥

नमस्ते भगवन्देव दत्तात्रेय जगत्प्रभो ।
सर्वबाधाप्रशमनं कुरु शान्तिं प्रयच्छ मे ॥ ८ ॥

अनसूयासुत श्रीश जनपातकनाशन ।

दिगंबर नमो नित्यं तुभ्यं मे वरदो भव ॥ ९ ॥

श्रीविष्णोरवतारोऽयं दत्तात्रेयो दिगंबरः ।

मालाकमंडलूच्छूलडमरूशङ्खचक्रधृक् ॥ १० ॥

नमस्ते शारदे देवि सरस्वति मतिप्रदे ।

वस त्वं मम जिह्वाग्रे सर्वविद्याप्रदा भव ॥ ११ ॥

दत्तात्रेयं प्रपद्ये शरणमनुदिनं दीनबंधुं मुकुंदम् ।

नैर्गुण्ये संनिविष्टं पथि परमपदं बोधयन्तं मुनीनाम् ॥

भस्माभ्यंगं जटाभिः सुललितमुकुटं दिक्पटं दिव्यरूपं ।

सह्याद्रौ नित्यवासं प्रमुदितममलं सद्गुरुं चारुशीलम् ॥ १२ ॥

इति श्री परमहंस परिव्राजकाचार्यवर्य श्री वासुदेवानन्द सरस्वती विरचिताः मन्त्रात्मकश्लोकाः ॥